# devIvaibhavAshcharyAShTottarashatadivyanAmAvaliH

# દેવીવૈભવાશ્ચર્યાષ્ટોત્તરશતદિવ્યનામાવલી

## Document Information

Text title : devIvaibhavAshcharyAShTottarashatadivyanAmAvaliH

File name : devIvaibhavAshcharya108nAma.itx

Category : aShTottarashatanAmAvalI, devii, dashamahAvidyA, nAmAvalI, devI

Location : doc_devii

Transliterated by : K S Ramachandran ramachandran_ksr at yahoo.ca

Proofread by : K S Ramachandran ramachandran_ksr at yahoo.ca

Description-comments : See corresponding stotra

Latest update : December 12, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# દેવીવૈભવાશ્ચર્યાષ્ટોત્તરશતદિવ્યનામાવલી

ૐ ઐં હ્રીં શ્રીં ।
ૐ પરમાનન્દલહર્યૈ નમઃ ।
ૐ પરચૈતન્યદીપિકાયૈ નમઃ ।
ૐ સ્વયંપ્રકાશકિરણાયૈ નમઃ ।
ૐ નિત્યવૈભવશાલિન્યૈ નમઃ ।
ૐ વિશુદ્ધકેવલાખણ્ડસત્યકાલાત્મરૂપિણ્યૈ નમઃ । ૫
ૐ આદિમધ્યાન્તરહિતાયૈ નમઃ ।
ૐ મહામાયાવિલાસિન્યૈ નમઃ ।
ૐ ગુણત્રયપરિચ્છેત્ર્યૈ નમઃ ।
ૐ સર્વતત્ત્વપ્રકાશિન્યૈ નમઃ ।
ૐ સ્ત્રીપુંસભાવરસિકાયૈ નમઃ । ૧૦
ૐ જગત્સર્ગાદિલંપટાયૈ નમઃ ।
ૐ અશેષનામરૂપાદિભેદચ્છેદરવિપ્રભાયૈ નમઃ ।
ૐ અનાદિવાસનારૂપાયૈ નમઃ ।
ૐ વાસનોદ્યત્પ્રપઞ્ચિકાયૈ નમઃ ।
ૐ પ્રપઞ્ચોપશમપ્રૌઢાયૈ નમઃ । ૧૫
ૐ ચરાચરજગન્મય્યૈ નમઃ ।
ૐ સમસ્તજગદાધારાયૈ નમઃ ।
ૐ સર્વસઞ્જીવનોત્સુકાયૈ નમઃ ।
ૐ ભક્તચેતોમયાનન્તસ્વાર્થવૈભવવિભ્રમાયૈ નમઃ ।
ૐ સર્વાકર્ષણવશ્યાદિસર્વકર્મદુરન્ધરાયૈ નમઃ । ૨૦
ૐ વિજ્ઞાનપરમાનન્દવિદ્યાયૈ નમઃ ।
ૐ સન્તાનસિદ્ધિદાયૈ નમઃ ।
ૐ આયુરારોગ્યસૌભાગ્યબલશ્રીકીર્તિભાગ્યદાયૈ નમઃ ।
ૐ ધનધાન્યમણીવસ્ત્રભૂષાલેપનમાલ્યદાયૈ નમઃ ।

ૐ ગૃહગ્રામમહારાજ્યસાંરાજ્યસુખદાયિન્યૈ નમઃ । ૨૫
ૐ સપ્તાઙ્ગશક્તિસમ્પૂર્ણસાર્વભૌમફલપ્રદાયૈ નમઃ ।
ૐ બ્રહ્મવિષ્ણુશિવેન્દ્રાદિપદવિશ્રાણનક્ષમાયૈ નમઃ ।
ૐ ભુક્તિમુક્તિમહાભક્તિવિરક્ત્યદ્વૈતદાયિન્યૈ નમઃ ।
ૐ નિગ્રહાનુગ્રહાધ્યક્ષાયૈ નમઃ ।
ૐ જ્ઞાનનિર્દ્વૈતદાયિન્યૈ નમઃ । ૩૦
ૐ પરકાયપ્રવેશાદિયોગસિદ્ધિપ્રદાયિની નમઃ ।
ૐ શિષ્ટસઞ્જીવનપ્રૌઢાયૈ નમઃ ।
ૐ દુષ્ટસંહારસિદ્ધિદાયૈ નમઃ ।
ૐ લીલાવિનિર્મિતાનેકકોટિબ્રહ્માણ્ડમણ્ડલાયૈ નમઃ ।
ૐ એકસ્મૈ નમઃ । ૩૫
ૐ અનેકાત્મિકાયૈ નમઃ ।
ૐ નાનારૂપિણ્યૈ નમઃ ।
ૐ અર્ધાઙ્ગનેશ્વર્યૈ નમઃ ।
ૐ શિવશક્તિમય્યૈ નમઃ ।
ૐ નિત્યશૃઙ્ગારૈકરસપ્રિયાયૈ નમઃ । ૪૦
ૐ તુષ્ટાયૈ નમઃ ।
ૐ પુષ્ટાયૈ નમઃ ।
ૐ અપરિચ્છિન્નાયૈ નમઃ ।
ૐ નિત્યયૌવનમોહિન્યૈ નમઃ ।
ૐ સમસ્તદેવતારૂપાયૈ નમઃ । ૪૫
ૐ સર્વદેવાધિદેવતાયૈ નમઃ ।
ૐ દેવર્ષિપિતૃસિદ્ધાદિયોગિનીભૈરવાત્મિકાયૈ નમઃ ।
ૐ નિધિસિદ્ધિમણીમુદ્રાયૈ નમઃ ।
ૐ શસ્ત્રાસ્ત્રાયુધભાસુરાયૈ નમઃ ।
ૐ છત્રચામરવાદિત્રપતાકાવ્યજનાઞ્ચિતાયૈ નમઃ । ૫૦
ૐ હસ્તાશ્વરથપાદાતામાત્યસેનાસુસેવિતાયૈ નમઃ ।
ૐ પુરોહિતકુલાચાર્યગુરુશિષ્યાદિસેવિતાયૈ નમઃ ।
ૐ સુધાસમુદ્રમધ્યોદ્યત્સુરદ્રુમનિવાસિન્યૈ નમઃ ।
ૐ મણિદ્વીપાન્તરપ્રોદ્યત્કદંબવનવાસિન્યૈ નમઃ ।
ૐ ચિન્તામણિગૃહાન્તસ્થાયૈ નમઃ । ૫૫
ૐ મણિમણ્ડપમધ્યગાયૈ નમઃ ।

ૐ રત્નસિંહાસનપ્રોદ્યત્શિવમઞ્ચાધિશાયિન્યૈ નમઃ ।
ૐ સદાશિવમહાલિઙ્ગમૂલસંઘટ્ટયોનિકાયૈ નમઃ ।
ૐ અન્યોન્યાલિઙ્ગસંઘર્ષકન્ડૂસંક્ષુબ્ધમાનસાયૈ નમઃ ।
ૐ કલોદ્યદ્બિન્દુકાલિન્યાતુર્યનાદપરંપરાયૈ નમઃ । ૬૦
ૐ નાદાન્તાનન્દસન્દોહસ્વયંવ્યક્તવચોઽમૃતાયૈ નમઃ ।
ૐ કામરાજમહાતન્ત્રરહસ્યાચારદક્ષિણાયૈ નમઃ ।
ૐ મકારપઞ્ચકોદ્ભૂતપ્રૌઢાન્તોલ્લાસસુન્દર્યૈ નમઃ ।
ૐ શ્રીચક્રરાજનિલયાયૈ નમઃ ।
ૐ શ્રીવિદ્યામન્ત્રવિગ્રહાયૈ નમઃ । ૬૫
ૐ અખણ્ડસચ્ચિદાનન્દશિવશક્ત્યૈકરૂપિણ્યૈ નમઃ ।
ૐ ત્રિપુરાયૈ નમઃ ।
ૐ ત્રિપુરેશાન્યૈ નમઃ ।
ૐ મહાત્રિપુરસુન્દર્યૈ નમઃ ।
ૐ ત્રિપુરાવાસરસિકાયૈ નમઃ । ૭૦
ૐ ત્રિપુરાશ્રીસ્વરૂપિણ્યૈ નમઃ ।
ૐ મહાપદ્મવનાન્તસ્થાયૈ નમઃ ।
ૐ શ્રીમત્ત્રિપુરમાલિન્યૈ નમઃ ।
ૐ મહાત્રિપુરસિદ્ધામ્બાયૈ નમઃ ।
ૐ શ્રીમહાત્રિપુરામ્બિકાયૈ નમઃ । ૭૫
ૐ નવચક્રક્રમાદેવ્યૈ નમઃ ।
ૐ મહાત્રિપુરભૈરવ્યૈ નમઃ ।
ૐ શ્રીમાત્રે નમઃ ।
ૐ લલિતાયૈ નમઃ ।
ૐ બાલાયૈ નમઃ । ૮૦
ૐ રાજરાજેશ્વર્યૈ નમઃ ।
ૐ શિવાયૈ નમઃ ।
ૐ ઉત્પત્તિસ્થિતિસંહારક્રમચક્રનિવાસિન્યૈ નમઃ ।
ૐ અર્ધમેર્વાત્મચક્રસ્થાયૈ નમઃ ।
ૐ સર્વલોકમહેશ્વર્યૈ નમઃ । ૮૫
ૐ વલ્મીકપુરમધ્યસ્થાયૈ નમઃ ।
ૐ જમ્બૂવનનિવાસિન્યૈ નમઃ ।
ૐ અરુણાચલશ઼ૃઙ્ગસ્થાયૈ નમઃ ।

ૐ વ્યાઘ્રાલયનિવાસિન્યૈ નમઃ ।
ૐ શ્રીકાલહસ્તિનિલયાયૈ નમઃ । ૯૦
ૐ કાશીપુરનિવાસિન્યૈ નમઃ ।
ૐ શ્રીમત્કૈલાસનિલયાયૈ નમઃ ।
ૐ દ્વાદશાન્તમહેશ્વર્યૈ નમઃ ।
ૐ શ્રીષોડશાન્તમધ્યસ્થાયૈ નમઃ ।
ૐ સર્વવેદાન્તલક્ષિતાયૈ નમઃ । ૯૫
ૐ શ્રુતિસ્મૃતિપુરાણેતિહાસાગમકલેશ્વર્યૈ નમઃ ।
ૐ ભૂતભૌતિકતન્માત્રદેવતાપ્રાણહૃન્મય્યૈ નમઃ ।
ૐ જીવેશ્વરબ્રહ્મરૂપાયૈ નમઃ ।
ૐ શ્રીગુણાઢ્યાયૈ નમઃ ।
ૐ ગુણાત્મિકાયૈ નમઃ । ૧૦૦
ૐ અવસ્થાત્રયનિર્મુક્તાયૈ નમઃ ।
ૐ વાગ્રમોમામહીમય્યૈ નમઃ ।
ૐ ગાયત્રીભુવનેશાનીદુર્ગાકાળ્યાદિરૂપિણ્યૈ નમઃ ।
ૐ મત્સ્યકૂર્મવરાહાદિનાનારૂપવિલાસિન્યૈ નમઃ ।
ૐ મહાયોગીશ્વરારાધ્યાયૈ નમઃ । ૧૦૫
ૐ મહાવીરવરપ્રદાયૈ નમઃ ।
ૐ સિદ્ધેશ્વરકુલારાધ્યાયૈ નમઃ ।
ૐ શ્રીમચ્ચરણવૈભવાયૈ નમઃ । ૧૦૮
શ્રીં હ્રીં ઐં ૐ ।

Encoded and proofread by K S Ramachandran
ramachandran_ksr at yahoo.ca
18 mayAnanda
66 shaktyaikya

*devIvaibhavAshcharyAShTottarashatadivyanAmAvaliH*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*